ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. VIII Apr,2015 - Sept, 2015 No. 1

वर्षम् – ८ अप्रेल – सितम्बर, २०१५ अङ्कः – प्रथमः

# प्राचीसुधा

# PRACI SUDHA

'प्राचीसुधा' सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ॥

सम्पादकः सञ्चालकश्च

डॉ. विश्वनाथस्वाईं

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओडिशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY
PURI, ODISHA

Scanned with CamScanner

## डॉ.डायालाल एम.मोकरिया

आचार्येण राजशेखरेण पञ्चमी साहित्यविद्या ' इत्युक्त्वा साहित्यस्याप्रतिमं महत्त्वं प्रतिपादितम् । साहित्यकारा: काव्यमाध्यमेन सामाजिकानां मनोरञ्जनं कुर्वन्ति किन्तु तेन सह समाजस्य वास्तविकतामपि प्रकटयन्ति । ते काव्यैः सामाजिकरहस्यानां, वैज्ञानिकतथ्यानामपि प्रस्तुतिं कुर्वन्ति । कुशलकविनां काव्ये प्रत्येकस्मिन् शब्दे एतादृशं सत्यम् आस्वादितं भवति । कालिदासः भवभूतिः, व्यासः, वाल्मीकिः बाणभट्टः, भासः, शूद्रकः इत्यादि कवयः काव्यैः यद् दत्तम् तत् अद्वितीयम् एव अस्ति । एतेषु कविषु शूद्रकस्य काव्यकौशल्यस्य एकः अंशः अत्र प्रस्तूयते ।

शूद्रकः मृच्छकटिके समाजस्य स्वाभाविकं वर्णनं करोति । सः विभिन्नपात्रसृष्टिं रचयित्वा सरलशैल्या काव्यकौशल्यप्रस्तुतति करोति । अत्र चारुदत्तः नायकः अस्ति एवं गणिका वसन्तसेना नायिका वर्तते । तयोः प्रणयप्रसङ्गं कविः उत्तमतया प्रस्तौति । एतस्मिन् प्रकरणे धुता, शर्विलकः, मदनिका, चेटः, वीटः, विदूषकः, शकारः, आर्यकः, रदनिका, रोहसेनः इत्यादि पात्राणि स्वस्व विशेषतां प्रकटीकुर्वन्ति ।

महाकविशूद्रकः रोहसेनस्य पात्रालेखने बालकस्य स्वाभाविकं चरित्रं वर्णयति । उक्तमस्ति यत् – आषोडशाद् भवेद् बालस्तरुणस्तत उच्यते । अर्थात् षोडशवर्षपर्यन्तं बाल्यावस्था भवति । तदनन्तरं तरुणावस्थायां प्रवेशः भवति । अनन्तशक्तिसम्पन्नपरब्रह्मणः अंशः स्वसङ्कल्पेन ज्ञानरूपाम् अक्षयभाण्डरूपां जीवनसम्पर्त्तिं नीत्वा जायते ।

स्वसङ्कल्पेन चेत्युक्तं चिदित्यपरनामकम् ।<br>
अनन्तचेतनाकाशं बालशब्देन कथ्यते ।।

बालकस्य व्यक्तित्वम् एव अस्वादनीयं भवति । एतादृशं बालचरित्रं शूद्रकेन रोहसेनस्य पात्रालेखने कृतम् ।

बालकस्य विश्वं अद्भूतम् भवति । सः यस्मिम् स्थाने भवति तत्रैव अन्तर्भावितः भवति । रोहसेनस्य अपि एतादृशं वर्तनम् अस्ति । रोहसेनः बहिः वर्तते ।

Scanned with CamScanner

तदा तस्य पिता चारुदत्तः रदनीकां कथयति मारुताभिलाषिणं रोहसेनम् अभ्यन्तरम् आनय [2] । अत्र पुत्रं प्रति पितुः चिन्ता अपि दृश्यते । रोहसेनस्य अपि बालसहजगुणः सूच्यते ।

मृच्छकटिकस्य षष्ठे अङ्के रोहसेनस्य पुनः प्रवेशः भवति । अत्र कविः तस्य चरित्रस्य विविधान् गुणान् प्रकटीकरोति । रोहसेनः बालसहजक्रीडावृत्तिं करोति । सः शकटेन क्रीडति । किन्तु धनिकपुत्रः यदा स्वस्य सुवर्णशकटं नीत्वा गच्छति तदा रदनिका रोहसेनाय मृत्तिकाशकटं ददाति [3] किन्तु सः तस्य अस्वीकारं करोति । सः सुवर्णशकटम् एव इच्छति । अत्रापि तस्य बालस्वभावः एव अस्ति । बालकः यदा क्रीडति तदा तस्मिन् विक्षेपः न करणीयः । अभिज्ञानशाकुन्तले सर्वदमनः सिंहबालकेन सह क्रीडति । यदा ऋषिका तं वारयति तदा सा एकां युक्तिम् अपि करोति ।

रोहसेनस्य चरित्रं मनोहरम् अस्ति । कस्यापि जनस्य सः प्रियः भवति । मृच्छकटिके गणिकायाः वसन्तसेनायाः अपि चित्तं सः हरति । नैतावतैव, सा तं पुत्रं मन्यते [4] । रोहसेनस्य शकटिका अपि सुवर्णस्य भवेत् तदर्थं सा स्वस्य आभूषणानि तस्यां शकटिकायां स्थापयति । तस्याः औदार्ये बालकं प्रति प्रेम दृश्यते । अत एव उक्तमस्ति यत् – Child is the father of the man.

बालके मातापित्रोः प्रभावः भवति एव । मनोवैज्ञानिकाः अपि प्रतिपादयन्ति यत् बालके मातापित्रोः चतुर्दशजनस्य प्रभावः भवति [5] । अत्रापि वसन्तसेना रोहसेने पितुः चारुदत्तस्य संस्कारम् अनुमिनोति ।

रोहसेनस्य निर्दोषता बालसहजा वर्तते । निरीक्षणशक्तिः उत्तमा वर्तते । यदा रदनिका वसन्तसेनां रोहसेनस्य मातृरूपेण परिचिनोति तदा सः आभूषणैः अलङ्कृतां वसन्तसेनां मातृरूपेण न स्वीकरोति । अपि च अश्रुपूर्णां वसन्तसेनाम् अपि मातरं न गणयति । दारिद्र्यवशात् तस्य माता आभूषणैः अलङ्कृता नासीत् तत् तस्य बालमानसं जानाति । पुत्रसमक्षं माता अश्रूणि अपि निःसारयति । तस्य अपि अत्र सूचनं वर्तते । बालकः गणिकाम् अपि परिवर्तयितुं शक्नोति तस्यापि अत्र निर्देशः वर्तते ।

महाकविः शूद्रकः रोजसेनस्य अल्पकालं यावत् एव पात्रत्वं निरूपयति । तदपि बालकानां स्वभावस्य सुन्दरं निरूपणं करोति । तेन अल्पीयैः शब्दैः अधिकं सूचितम् । संस्कृतसाहित्ये निरूपितेषु बालपात्रेषु वणिक्पुत्रस्य रोहसेनस्य पात्रत्वं विशिष्टं वर्तते । अत्रापि कविप्रतिभा दीप्यते ।

---

Scanned with CamScanner

सन्दर्भाः –

१. काव्यमीमांसा, अ.२, पृ.१६, चौचम्बा प्रकाशन, वाराणसी, वि.सं.२०७१ ।

२. रदनिके मारुताभिलाषी प्रदोषशीतार्तो रहोसेनः । ततः प्रवेश्यतामभ्यन्तरमयम् । – मृच्छकटिकम्–१, पृ.१ ।

३. एहि वत्स शकटिकया क्रीडावः । मृच्छकटिकम्–६, पृ.२८७ ।

४. एहि वत्स पत्रक, आलिङ्ग । मृच्छकटिकम्–६, पृ.२८६ ।

५. सामान्यमनोविज्ञानम्, पृ.३५ ।

६. न केवलं रूपं शीलमपि तर्कयामि । – मृच्छकटिकम्–६, पृ.२८६ ।

*****

आसि.प्रोफेसर

अनुस्नातकभवनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम् (गुजरातप्रदेशः)

Scanned with CamScanner